मस्तुलुङ्गकः, पुं, ( मस्तुलुङ्ग + स्वार्थे कन् । ) मस्तिष्कम् । इति हेमचन्द्रः । ३ । २८६ ॥

मह, पूजे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) महति । इति दुर्गादासः ॥

मह, इ क त्विषि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । ) इ क, मंहयति । त्विषि दीप्तौ । इति दुर्गादासः ॥

मह, इ ङ वृद्धौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । ) इ, मंह्यते । ङ, मंहते । इति दुर्गादासः ॥

मह, त क पूजे । इति कविकल्पद्रुमः । ( अदन्त चुरा०-पर०-सक०-सेट् । ) महयति । इति दुर्गादासः ॥

महः, पुं, ( मह्यते पूज्यतेऽसाविति । मह + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । मह + अप् इत्युज्ज्वलदत्तः ।४।१८८ । ) उत्सवः । इत्यमरः । १ । ७ । १८८ ॥ ( यथा, माघे । ६ । १६ ।

"न खलु दूरगतोऽप्यतिवर्त्तते
महमसाविति बन्धुतयोदितैः ॥"

महते पूज्यते इति । ) तेजः । इति मेदिनी । हे, ७ ॥ यज्ञः । इति शब्दरत्नावली ॥ ( यथा, हरिवंशे । ७१ । १८ ।

"तस्मात् प्रावृषि राजानः सर्व्वे शक्रं मुदा युताः ।
महैः सुरेशमर्च्चन्ति वयमन्ये च मानवाः ॥" )

महिषः । इति हेमचन्द्रः ॥ ( त्रि, महत् । यथा, ऋग्वेदे । १० । ६१ । ८ ।

"महे इयते नान्यं त्वत् ॥"

"महे महति ।" इति तद्भाष्ये सायनः ॥ )

महः, [स्] क्ली, ( मह्यते पूज्यतेऽस्मिन्निति । मह + "सर्व्वधातुभ्योऽसुन् ।" उणा० ४।१८८ । इति असुन् । ) उत्सवः । (मह्यते पूज्यते इति । मह + असुन् । ) तेजः । इति मेदिनी । से,१० ॥ ( यथा, रघुटीकारम्भे मल्लिनाथः ।

"अन्तरायतिमिरोपशान्तये
शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे
मन्महे किमपि तुन्दिलं महः ॥"

मह्यन्ते पूज्यन्ते देवादयोऽस्मिन्निति । मह + असुन् । ) यज्ञः । इति शब्दरत्नावली ॥ ( उदकम् । इति निघण्टुः ।१।१२। पूज्यमाने, त्रि । यथा, वाजसनेयसंहितायाम् । २० । ६ ।

"जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड् भामः ॥"

"वाक् वागिन्द्रियं महः पूज्यमानास्तु ।" इति तद्भाष्ये महीधरः ॥ महति । यथा, ऋग्वेदे । ८ । २३ । २६ ।

"महो राये तमुत्वा समिधीमहि ।" "महो महते राये धनाय ।" इति तद्भाष्ये सायनः ॥)

महक्कः, पुं, ( महः कायति प्रकाशयतीति । महस् + कै + कः । पृषोदरादित्वात् साधुः ।) बहुलामोदः । इति जटाधरः ॥

महत्, क्ली, ( मह + अति । निपातितश्च । ) राज्यम् । इति मेदिनी । ते, १४० ॥ ( यथा, छान्दोग्योपनिषदि । ५ । २ । ४ ।

"अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ इत्यादि ॥" ब्रह्म । यथा, महाभारते । ३ । ३१२ । ४४ ।

"श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत् ॥"

उदकम् । इति निघण्टुः । १ । १२ । )

महत्, त्रि, ( मह्यते पूज्यतेऽसौ इति । मह + "वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ।" उणा० २ । ८४ । इति अतिः निपात्यते । ) महान् । महती । बृहत् । इति मेदिनी । ते, १४० ॥ तत्पर्य्यायः । विशङ्कटम् २ पृथु ३ बृहत् ४ विशालम् ५ पृथुलम् ६ वड्रम् ७ उरु ८ । विपुलम् ९ । इत्यमरः । ३ । १ । ६० ॥ पुलम् १० विस्तीर्णम् ११ । इति शब्दरत्नावली ॥ ( यथा, रघौ । १२ । ४० ।

"तस्मिन् रामशरोत्कृत्ते बले महति रक्षसाम् ।")

तद्वैदिकपर्य्यायः । ब्रध्नः २ ऋष्वः ३ बृहत् ४ उक्षितः ५ तवसः ६ तविषः ७ महिषः ८ अभ्वः ९ ऋभ्वाः १० उक्षाः ११ विहायाः १२ यह्वः १३ ववक्षिथ १४ विवक्षसे १५ अम्भृणः १६ माहिनः १७ गभीरः १८ ककुहः १९ रभसः २० ब्राधन् २१ विरप्शी २२ अद्भुतम् २३ वर्हिष्ठः २४ वर्हिषत् २५ । इति पञ्चविंशतिर्महन्नामानि । इति वेदनिघण्टौ ३ अध्यायः ॥ * ॥ ( प्रकृतेराद्यो विकारः । यथा, सांख्यसूत्रम् । १ । ६१ ।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारः ॥" इति ॥ ) महच्छब्दस्य शुद्धादिशब्दविशेषायां पूर्व्वं प्रयोगनिषेधो यथा,—

"शुद्धे तेजे तथा मांसे वैद्ये ज्योतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥"

इति भट्टिप्रथमसर्गीयचतुर्थश्लोकटीकायां भरतः ॥

महती, स्त्री, ( महत् + ङीप् । ) वल्लकीभेदः । इति मेदिनी । ते,१४० ॥ नारदवीणा । बृहत्प्रमाणा । इत्यमरटीकायां भरतः ॥ (यथा, शिशुपालवधे । १ । १० ।

"स्फुटीभवद्ग्रामविशेषमूर्च्छना-
मवेक्षमाणं महतीं मुहुर्मुहुः ॥" )

बृहती । वार्त्ताकी । इति राजनिर्घण्टः ॥ (कुशद्वीपस्थनदीविशेषः । यथा, मात्स्ये । १२१ । ७४ ।

"महती सप्तमी प्रोक्ता पुनश्चैषा धृतिः स्मृता ।
अन्यास्ताभ्योऽपि सञ्जाता शतशोऽथ सहस्रशः ॥"

पारिपात्रनिर्गतनदीविशेषः । यथा, मात्स्ये । ११३ । २३—२४ ।

"वर्णाशा चन्दना चैव कावेरी महती तथा ।
पारा चर्म्मण्वती पुण्या विदुषा वेत्रवत्यपि ।
शिप्रा ह्यवन्ती कुन्ती च पारिपात्राश्रिताः स्मृताः ॥")

महतीद्वादशी, स्त्री, (महतीति ख्याता द्वादशी ।) श्रवणद्वादशी । यथा,—

"मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता ।
महती द्वादशी ज्ञेया उपवासे महाफला ॥"

इति गारुडे १४१ अध्यायः ॥

महत्तत्त्वं, क्ली, ( महच्च तत् तत्त्वञ्चेति । ) चतुर्व्विंशतितत्त्वान्तर्गतद्वितीयतत्त्वम् । तत्तु प्रकृतेरुत्पन्नम् । समष्टिबुद्धिस्वरूपम् । तत्पर्य्यायः । यथा,—

"महानात्मा मतिर्व्विष्णुर्जिष्णुः शम्भुश्च वीर्य्यवान् ।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः ।
पर्य्यायवाचकैः शब्दैर्महानात्मा विभाव्यते ।
तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधिगच्छति ॥"

इति महाभारते आश्वमेधिकपर्व्व ॥

अपि च ।

"एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः ।
सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते ॥
महानिति यतः ख्यातिर्लोकानां जायते सदा ।
अहङ्कारश्च महतो जायते मानवर्द्धनः ॥"

इति मात्स्ये ३ अध्यायः ॥

महत्तरः, पुं, स्त्री, (अयमनयोरतिशयेन महान् । महत् + तरप् । ) शूद्रः । यथा,—

"शूद्रः स्यात् पादजो दासो ग्रामकूटो महत्तरः ।"

इति त्रिकाण्डशेषः ॥

( यथा, कथासरित्सागरे । ५ । ३४ ।

"केनायं रचितोऽत्रेति सोऽपृच्छच्च महत्तरान् ।
ते च न्यवेदयंस्तस्मै कर्त्तारं तिलकस्य माम् ॥")

अतिशयमहति, त्रि ॥ ( यथा, महाभारते । ७ । १६६ । ५६ ।

"ददर्श भूशदुर्दर्शं सर्व्वदेवैरभिष्टुतम् ।
अणीयांसमणुभ्यश्च बृहद्भ्यश्च महत्तरम् ॥" )

महत्त्वं, क्ली, ( महत् + त्व । ) महतो भावः । यथा, भाषापरिच्छेदे ।

"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ॥"

"महत्त्वं षड्विध इति । द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम् । द्रव्यसमवेतानां गुणकर्म्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन । द्रव्यसमवेतसमवेतानां रूपत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणम् ।" इति सिद्धान्तमुक्तावली ॥ ( श्रेष्ठत्वम् । यथा, रामायणे । १ । १ । १०१ ।

"जनश्च शूद्रोऽपि महत्त्वमीयात् ॥"

"महत्त्वं श्रेष्ठत्वम् ।" इति तट्टीका । )

महर्लोकः, पुं, ( महश्चासौ लोकश्चेति । कर्म्मधारयः । ) भूरादिसप्तलोकान्तर्गतचतुर्थलोकः । यथा,—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च ।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः ॥
चतुर्मुखदिनस्यान्ते जगदेतच्चराचरम् ॥